# श्रीवादिराजस्तोत्रम्

चन्द्रार्ककोटिलावण्यलक्ष्मीशकरुणालयम् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥१॥

इन्द्रादिदेवताराध्यमध्वसद्वंशमादरात् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥२॥

श्रीहयास्यार्चनरतं साधुवेदार्थबोधकम् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥३॥

दुर्वादिमत्तद्विरदकण्ठीरवमहर्निशम् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥४॥

सर्वकामप्रदं श्रीमद्द्विजेन्द्रकुलशेखरम् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥५॥
मन्त्रक्रमविचारज्ञं तन्त्रशास्त्रप्रवर्तकम् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥६॥

ज्ञानादिगुणसम्पन्नमशेषाघहरं शुभम् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥७॥

प्रदक्षिणीकृतभुवं त्वक्षमालाधरं विभुम् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥८॥

विचित्रमुकुटोपेतमचिन्त्याद्भुतदर्शनम् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥९॥

पुरतो व्यासदेवस्य निवसन्तं महाद्युतिम् ।
वन्दिताङ्घ्रियुगं सद्भिः वादिराजं नतोऽस्म्यहम् ॥१०॥

।। इति वादिराजस्तोत्रम ।।